E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.334

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि–सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# आचार्यशङ्करकृतब्रह्मसूत्राध्यासभाष्यम् : एकं मनोवैज्ञानिकविश्लेषणम्

सौरभः दे
ग्राम / पत्रा. -हाटकृष्णनगर
जेला – वाँकुड़ा, पिन -722206
दूरवाणी - 7044707732
dsourav.rkmvu@gmail.com

**प्रबन्धसारः (Abstract) -**

भारतीयानां मनीषिणां ज्ञानविज्ञानपरम्परायाः आधारशिला वेदाः एव सन्ति। वेदाः हि समस्तविद्यानां मूलप्रभवः। वेदानन्तरं भारतीयज्ञानपरम्परायां **प्रस्थानत्रयी** नामकं महत्त्वपूर्णं प्रकाशस्तम्भवत् स्थानं धारयति। तत्र —

१. श्रुतिप्रस्थानम् — उपनिषदः
२. स्मृतिप्रस्थानम् — श्रीमद्भगवद्गीता
३. न्यायप्रस्थानम् — ब्रह्मसूत्राणि

आचार्यः **शङ्करः** प्रस्थानत्रय्याः भाष्यरचनया अद्वैतवेदान्तस्य सुदृढां प्रतिष्ठां कृतवान्। अद्वैतवेदान्तदर्शने एकमेव ब्रह्म अथवा आत्मा परमसत्तारूपेण स्वीक्रियते, यतः स एव त्रिकालाबाधितः, नित्यः, एकः, चैतन्यस्वरूपः, साक्षी, सर्वव्यापी च अस्ति।यथा श्रुतौ उक्तम् —

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च॥[1]

[1] श्वेताश्वतरोपनिषद्, गीताप्रेस, गोरखपुर, वि०सं० २०६६.

अत्र प्रश्नोऽयं समुत्पद्यते— यत् एकः, चैतन्यस्वरूपः, साक्षी, निर्गुणश्च आत्मा अथवा ब्रह्म कथं नाम अनेकेषु सगुणेषु जीवेषु जडेषु पदार्थेषु च भासमानः दृश्यते? तथा च अस्मिन् जगति कर्तृत्वभोक्तृत्वादिव्यवहारं कुर्वतः जीवस्य उपपत्तिः कथं सिध्यति? अस्याः प्रमुखायाः तत्त्वमीमांसात्मकसमस्यायाः समाधानार्थम् आचार्यः शङ्करः ब्रह्मसूत्रभाष्यस्य आरम्भे उपोद्घातरूपेण **अध्यासभाष्यं** निरूपितवान्। तत्र सः एकं सूक्ष्मं मनोवैज्ञानिकं सिद्धान्तं प्रतिपादयति— यथा एकस्य चैतन्यस्वरूपस्य ब्रह्मणः अथवा आत्मनः अनेकानाम् अनात्मपदार्थानां मध्ये भानं भवति, तस्य कारणं **अस्मद्युष्मत्प्रत्यययोः सत्यानृतमिथुनीकरणरूपः अध्यासः, (तमेतमेवंलक्षणमद्यामं पण्डिता अविद्येति मन्यन्ते । ब्रह्मसूत्राकरभाष्य५२ .वही ,)** यः अज्ञानम् अथवा अविद्या इति कथ्यते। अस्य अध्यासस्य प्रभावात् जीवः स्वात्मानं ज्ञाता, कर्ता, भोक्ता इति मन्यते। अस्मिन् शोधप्रबन्धे अध्यासभाष्यस्य **मनोवैज्ञानिकदृष्ट्या विश्लेषणं** कृतम् अस्ति, यत् मानवीयव्यवहारस्य मनोवैज्ञानिकमूलाधारं प्रकाशयति— यथा शुद्धचैतन्यस्वरूपः आत्मा अपि जगति प्रमाणप्रमेयव्यवहारस्य कर्ता इव जीवत्वेन प्रतीयते।

**मूलशब्दाः (Key Words)** — आत्मा, अनात्मा, अध्यासः, मिथ्यात्वम्, सदसद्विलक्षणता, प्रातिभासिकसत्ता, चिदात्मा, अस्मत्प्रत्ययगोचरः, युष्मत्प्रत्ययगोचरः।

## भूमिका (Introduction)

आचार्यशङ्करः **अध्यासभाष्ये** अध्यासस्य विवेचनं कुर्वन् दर्शनशास्त्रस्य मूलभूतां *भ्रमसमस्याम्* आनुभाविकव्यावहारिकदृष्ट्या विश्लेषितवान्। आचार्यस्य मतानुसारं समस्तः लोकव्यवहारः द्वयोः तत्त्वयोः तादात्म्यसम्बन्धे अथवा मिथुनभावे प्रतिष्ठितः अस्ति। तयोः प्रथमं तत्त्वं शुद्धचैतन्यस्वरूपः **आत्मा**, यः अहंप्रत्ययगोचरः, विषयी, चेतनः, नित्यः च अस्ति। द्वितीयं तत्त्वं **अनात्मा**— यथा देहः, इन्द्रियाणि, अन्तःकरणं च— यः युष्मत्प्रत्ययगोचरः, विषयः, जडः, अनित्यः च अस्ति। यद्यपि विषयी आत्मा तथा विषयभूतः अनात्मा— एतौ तमःप्रकाशवत् परस्परविरुद्धस्वभावौ स्तः— तयोः कदापि तादात्म्यसम्बन्धः सम्भवितुं न शक्यते। यथोक्तम्—

**"युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः तमःप्रकाशवद्विरुद्धस्वभावयोः इतरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः।"**[2] यदा आत्मनः अनात्मनश्च तादात्म्यसम्बन्धः असम्भवः, तदा तयोः परस्परधर्माध्यासोऽपि वस्तुतः न सम्भवति; अतः सः मिथ्यैव। तथापि एतस्य

[2] ब्रह्मसूत्रशांकरभाष्य, अनु० यतिवरभोलेबाबा, भारतीय विद्या प्रकाशन, नई दिल्ली, प्रयमभाग, पृ०१०,२००४.

तादात्म्याभासस्य विना कर्तृत्वभोकृत्वादिलक्षणस्य जीवस्य उपपत्तिः न स्यात्। यदि जीवस्योपपत्तिः न स्यात्, तर्हि समस्तः लोकव्यवहारः कथं सम्भवेत्? अस्य लोकव्यवहारस्य कारणं **अध्यास** नाम प्रक्रिया, या माया अथवा अविद्या इति कथ्यते। अध्यासः अविद्यायाः कार्यत्वात् अविद्यैव इति मन्यते। एषा अविद्या अथवा माया बीजशक्तिरूपा अस्ति— या विराट्समष्टेः भ्रान्तिरूपा, अव्यक्ता, सदसद्विलक्षणा, परमेश्वराश्रया च।यथोक्तम्—**"अविद्यात्मिका हि बीजशक्तिरव्यक्तपदनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः, यस्यां स्वरूपबोधरहिताः शेरते संसारीणो जीवाः।"**[3] एतदेव अव्यक्तं क्वचित् **आकाशशब्देन**, क्वचित् **अक्षरशब्देन**, क्वचित् **माया** इति पदेन श्रुतिषु निर्दिष्टम्। यथा—"**एतस्मिन्नु गार्ग्याकाश ओतश्च प्रोतश्च**"[4], "**अक्षरात् परतः परः**"[5] "**माया तु प्रकृतिं विद्यात्**"[6] अतः अविद्या अथवा माया **सदसद्विलक्षणा** इति उच्यते, यतः तस्याः तत्त्वतः अन्यत्वतः वा निरूपणं न शक्यते। अज्ञानकृतस्य अस्य अध्यासस्य प्रभावः **भगवद्गीतायाम्** अपि जीवमोहकारणरूपेण वर्णितः अस्ति— **"नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥"**[7] अस्य श्लोकस्य व्याख्याने **शङ्कराचार्यः** लिखति— **"अज्ञानेन आवृतं ज्ञानं विवेकविज्ञानं; तेन मुह्यन्ति— 'करोमि, कारयामि, भुङ्क्ते, भोजयामि' इत्यादिरूपं मोहं गच्छन्ति अविवेकिनः संसारिणो जन्तवः।"**

**अध्याससिद्धान्तः — शाङ्करवेदान्ते तत्त्वमीमांसा--**

अद्वैतवेदान्तदर्शने अध्याससिद्धान्तः अत्यन्तं मौलिकः आधारभूतश्च सिद्धान्तः अस्ति। आचार्यशङ्करः ब्रह्मसूत्रभाष्यस्य प्रारम्भे एव अध्यासभाष्ये अस्य सिद्धान्तस्य प्रतिपादनं कृत्वा सम्पूर्णस्य अद्वैतवेदान्तदर्शनस्य आधारं निर्मितवान्। शङ्करमतानुसारं संसारस्य मूलकारणं अविद्या अस्ति, तस्या एव कार्यरूपः अध्यासः इति स्वीक्रियते। शङ्कराचार्यः अध्यासं परिभाषयन् लिखति— **"स्मृतिरूपः परत्र पूर्वदृष्टावभासः।"**[8] अर्थात् पूर्वं दृष्टस्य वस्तुनः स्मृतिरूपेण अन्यत्र अवभासनं अध्यासः इति। एवं अध्यासः वस्तुतः मिथ्याज्ञानरूपः आरोपः अस्ति, यस्मिन् आत्मनः अनात्मनि तथा अनात्मनः आत्मनि परस्परं धर्माणां आरोपः दृश्यते।

---

[3] सदसदविलक्षणत्वं मिथ्यात्वं तत्त्वप्रदीपिका सम्पा०, योगीन्द्रानन्द, पडदर्शनप्रकाशन प्रतिष्ठान वाराणसी, 1974.

[4] बृहदारण्यकोपनिषद् ३।८।११

[5] मुण्डकोपनिषद् २।१।२

[6] श्वेताश्वतरोपनिषद् ४।१०

[7] भगवद्गीताशांकरभाष्य ५/१५. गीताप्रेस गोरखपुर, पृ०१५९, सं २०६६

[8] ब्रह्मसूत्रशांकरभाष्य, अनु० यतिवरभोलेबाबा, भारतीय विद्या प्रकाशन, नई दिल्ली, प्रयमभाग, पृ०१०,२००४

**अध्यासस्य स्वरूपम्** -अध्यासः सामान्यतया अतस्मिन् तद्बुद्धिः इति परिभाषया व्याख्यायते। अर्थात् यत्र यत् वस्तु नास्ति, तत्र तस्य वस्तुनः बुद्धिः जायते, सः अध्यासः। उदाहरणरूपेण—

- रज्जौ सर्पबुद्धिः
- शुक्तौ रजतबुद्धिः
- आत्मनि देहबुद्धिः

एतेषु सर्वेषु उदाहरणेषु वास्तविकवस्तु एकं भवति, किन्तु अज्ञानवशात् अन्यस्य वस्तुनः तत्र आरोपः भवति।

शङ्कराचार्यः अध्यासस्य स्वरूपं स्पष्टयन् लिखति—"**अतस्मिन् तद्बुद्धिरित्यध्यासः**।"[9] अर्थात् यत्र वस्तु नास्ति तत्र तस्य ज्ञानं अध्यासः इति।

**अध्यासस्य लक्षणानि-** आचार्यशङ्करः अध्यासस्य त्रिणि प्रमुखलक्षणानि निर्दिशति—

(१) **स्मृतिरूपः परत्र पूर्वदृष्टावभासः** - अध्यासः तादृशः ज्ञानप्रकारः अस्ति, यत्र पूर्वं दृष्टस्य वस्तुनः स्मृतिरूपेण अन्यत्र अवभासः भवति। उदाहरणम्— अन्धकारे रज्जुं दृष्ट्वा मनुष्यः तत्र सर्पं मन्यते। अत्र सर्पः वस्तुतः नास्ति, किन्तु पूर्वानुभूतसर्पस्य स्मृतिः रज्जौ आरोपिता भवति।एवमेव—

- देहादीनां धर्माः आत्मनि आरोप्यन्ते।
- आत्मनः चैतन्यं देहे आरोप्यते।

अतः शङ्कराचार्यः अध्यासं स्मृतिजन्यः मिथ्यावभासः इति मन्यते।

(२) **अन्यस्य अन्यधर्मावभासता** - अध्यासस्य द्वितीयं लक्षणं भवति—अन्यस्य धर्माणां अन्यस्मिन् अवभासनम्।अर्थात् एकस्य वस्तुनः धर्माः अन्यस्मिन् वस्तुनि दृश्यन्ते।उदाहरणम्—

- सर्पस्य भयकारित्वं रज्जौ अनुभवति।
- देहस्य जडत्वं आत्मनि आरोप्यते।
- आत्मनः चैतन्यं देहे आरोप्यते।

एवं धर्मधर्मिणोः परस्परविपर्यासः अध्यासस्य स्वरूपम्।

(३) **अतस्मिन् तद्बुद्धिः** - अध्यासस्य तृतीयं लक्षणं प्रसिद्धं न्यायसूत्ररूपं वाक्यम्— "अतस्मिन् तद्बुद्धिः।" अर्थात्—

- यत्र सर्पः नास्ति तत्र सर्पज्ञानम्
- यत्र रजतं नास्ति तत्र रजतज्ञानम्
- यत्र आत्मा शुद्धचैतन्यस्वरूपः तत्र देहबुद्धिः इदमेव अध्यासस्य मूलस्वरूपम्।

---

[9] ब्रह्मसूत्रशांकरभाष्य, अनु० यतिवरभोलेबाबा, भारतीय विद्या प्रकाशन, नई दिल्ली, प्रयमभाग, २००४

३. **आत्मानात्मनोरध्यासः** - अद्वैतवेदान्ते मुख्यतः आत्मानात्मनोरन्योन्याध्यासः स्वीक्रियते। शङ्कराचार्यः लिखति—

“**आत्मन्यनात्माध्यासः, अनात्मनि चात्माध्यासः।**” [10]अर्थात्—

1. आत्मनि अनात्मधर्माणामारोपः
2. अनात्मनि आत्मधर्माणामारोपः इदमेव संसारस्य मूलं कारणम्। उदाहरणम्—

- “अहं स्थूलः”, “अहं दुःखी”, “अहं कर्ता”, “अहं भोक्ता” ।एते सर्वे आत्मानात्मविपर्यासजन्याः ज्ञानप्रकाराः सन्ति।

**अध्यासस्य प्रकाराः** - अध्यासस्य भेदविचारः अपि वेदान्तग्रन्थेषु दृश्यते।

(१) अहंकाराध्यासः-यदा आत्मा देहादिषु आरोप्यते तदा मनुष्यः—अहं स्थूलः-अहं कृशः-अहं रोगी इत्यादि प्रकारेण आत्मानं देहात्मकं मन्यते। अयं अहंकाराध्यासः इति कथ्यते।

(२) ममकाराध्यासः- अहंकारस्य अनन्तरं ममत्वबुद्धिः जायते।उदाहरणम्-मम शरीरम् -मम गृहः-मम पुत्रः अयं ममकाराध्यासः इति प्रसिद्धः। भामतीकारः वाचस्पतिमिश्रः लिखति- **“अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः।”**[11] अर्थात् “मैं” तथा “मेरा” इति व्यवहारः स्वाभाविकः संसारधर्मः अस्ति।

**अध्यासस्य अन्ये भेदाः**- गोविन्दाचार्यादिभिः अध्यासस्य पञ्च भेदाः निर्दिष्टाः—

1. अर्थाध्यासः – वस्तुनः आरोपः
2. ज्ञानाध्यासः – ज्ञानरूपाध्यासः
3. अन्योन्याध्यासः – परस्परारोपः
4. तादात्म्याध्यासः – अभेदबुद्धिः
5. संसर्गाध्यासः – सम्बन्धाध्यासः तथापि एते सर्वे भेदाः अन्ततः आत्मानात्मविपर्यासरूपे अध्यासे एव अन्तर्भवन्ति।

**अध्यासस्य निवृत्तिः**- अद्वैतवेदान्तदर्शने अध्यासः संसारबन्धस्य मूलकारणं परिगण्यते। यावत् आत्मनः अनात्मनि तथा अनात्मनः आत्मनि आरोपः वर्तते, तावत् जीवः कर्तृत्वभोक्तृत्वादिभिः

---

[10] ब्रह्मसूत्रशांकरभाष्य, अनु० यतिवरभोलेबाबा, भारतीय विद्या प्रकाशन, नई दिल्ली, प्रयमभाग,२००४

[11] वाचस्पतिमिश्रः —*भामती*, ब्रह्मसूत्रभाष्यटीका

संसारधर्मैः बद्धः भवति। अतः अध्यासस्य निवृत्तिः एव मोक्षप्राप्तेः प्रमुखोपायः इति वेदान्तदर्शनस्य अभिप्रायः।आचार्यशङ्करः अध्यासभाष्ये स्पष्टतया सूचयति यत् संसारस्य सम्पूर्णः व्यवहारः अध्यासाधिष्ठितः एव अस्ति। मनुष्यः स्वात्मानं देहेन, इन्द्रियैः, मनसा, बुद्ध्या च अभिन्नं मन्यते। अयं भ्रान्तिज्ञानप्रकारः एव अध्यासः। अस्य कारणं मूलतः **अविद्या** अस्ति। यावत् अविद्या न नश्यति, तावत् अध्यासः अपि न निवर्तते।अतः वेदान्ते अध्यासनिवृत्तेः प्रमुखं साधनं **आत्मज्ञानम्** एव स्वीकृतम्। शङ्कराचार्यः मन्यते—**“ज्ञानादेव तु कैवल्यम्।”** अर्थात् केवलं ज्ञानमेव मोक्षस्य साधनं भवति।

**अविद्यानाशेन अध्यासनिवृत्तिः -** अध्यासस्य मूलं कारणं अविद्या अस्ति। अविद्या एव आत्मनः स्वरूपं न प्रकाशयति तथा च अनात्मनः आत्मत्वेन अवभासं जनयति। उपनिषद् अपि अज्ञानस्य नाशं मोक्षस्य साधनं मन्यते—

**“तम एव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।”**[12] अर्थात् परमात्मतत्त्वस्य ज्ञानात् एव मनुष्यः संसाररूपं मृत्युम् अतिक्रामति। अन्यः कश्चित् मार्गः नास्ति। यदा आत्मतत्त्वज्ञानं जायते, तदा अविद्या नश्यति। अविद्यानाशे सति अध्यासः अपि स्वयमेव निवर्तते।

**आत्मज्ञानस्य साधनानि** -अद्वैतवेदान्ते आत्मज्ञानप्राप्तेः साधनानि श्रवण–मनन–निदिध्यासन इति त्रयम् उच्यते।

(१) श्रवणम् - श्रवणं नाम उपनिषदादिशास्त्रेषु प्रतिपादितस्य ब्रह्मतत्त्वस्य आचार्योपदेशेन श्रवणम्।

यदा शिष्यः गुरोः समीपे उपनिषद्वाक्यानि शृणोति, तदा ब्रह्मस्वरूपस्य प्रथमं बोधः जायते। उपनिषद् वदति—

**“आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।”**[13]

(२) मननम् - श्रवणेन प्राप्तस्य तत्त्वज्ञानस्य युक्त्या विचारः मननम् इति कथ्यते। अत्र शिष्यः शास्त्रवाक्यानि तथा तेषां तात्पर्यं बुद्ध्या विश्लेषयति, संशयान् निवर्तयति।

(३) निदिध्यासनम्- श्रवणमननाभ्यां सिद्धस्य ज्ञानस्य दृढीकरणार्थं निरन्तरं ध्यानरूपचिन्तनं निदिध्यासनम् इति उच्यते।

---

[12] श्वेताश्वतरोपनिषद् 3.8

[13] बृहदारण्यकोपनिषद् 2.4.5

अस्य अभ्यासेन आत्मज्ञानं स्थिरं भवति तथा च अविद्याजनितः अध्यासः नश्यति।

**ब्रह्मात्मैक्यज्ञानस्य फलम्**- यदा जीवः आत्मानं ब्रह्मरूपं जानाति, तदा संसारस्य मिथ्यात्वबुद्धिः उत्पद्यते।

उपनिषद् वदति— **"ब्रह्मविद् ब्रह्मैव भवति।"** [14] अर्थात् ब्रह्मज्ञानी स्वयं ब्रह्मस्वरूपः एव भवति। तदा— कर्तृत्वम् निवर्तते, भोक्तृत्वम् निवर्तते, सुखदुःखबन्धः नश्यति,अध्यासः पूर्णतया लीयते।

**रज्जुसर्पदृष्टान्तेन अध्यासनिवृत्तिः** - अध्यासस्य निवृत्तिं बोधयितुं वेदान्ते रज्जुसर्पदृष्टान्तः प्रसिद्धः। अन्धकारे रज्जुं दृष्ट्वा मनुष्यः सर्पं मन्यते। यदा दीपप्रकाशेन रज्जोः यथार्थज्ञानं भवति, तदा सर्पभ्रमः नश्यति। तत्र-सर्पः = अध्यासः, अज्ञानम् = अन्धकारः, रज्जुज्ञानम् = आत्मज्ञानम्। यदा रज्जोः ज्ञानं भवति, तदा सर्पस्य नाशः स्वतः भवति।एवमेव आत्मज्ञानात् अध्यासः निवर्तते।

**जीवन्मुक्तावस्था**- अध्यासस्य पूर्णनिवृत्तिः जीवन्मुक्तावस्थायाम् दृश्यते। शङ्कराचार्यः मन्यते यत् ब्रह्मज्ञानी संसारमध्ये अपि स्थित्वा बन्धनात् मुक्तः भवति।तस्य लक्षणं गीता वदति— **"स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।"**[15]

**जीवन्मुक्तः**— अहंकारं न अनुभवति, ममकारं न अनुभवति, आत्मानं ब्रह्मरूपेण पश्यति। अतः तस्य सर्वः अध्यासः निवृत्तः भवति।

**उपसंहारः**- अतः स्पष्टं भवति यत् अद्वैतवेदान्ते अध्यासः संसारबन्धस्य मूलं कारणम्। अस्य कारणं अविद्या अस्ति। अविद्यानाशेन एव अध्यासस्य निवृत्तिः सम्भवति।श्रवण–मनन–निदिध्यासनरूपैः साधनैः आत्मज्ञानं प्राप्यते। आत्मज्ञानात् अविद्या नश्यति, तथा च अध्यासः अपि पूर्णतया निवर्तते।तदा जीवः स्वस्य नित्यशुद्धबुद्धमुक्तस्वरूपं ब्रह्मतत्त्वं अनुभूय मोक्षं प्राप्नोति। पुनश्च उपर्युक्तस्य विवेचनस्य अनन्तरं निष्कर्षरूपेण वक्तुं शक्यते यत् **अध्यासभाष्यम्** मानवीयव्यवहारस्य मनोवैज्ञानिकं विश्लेषणं प्रस्तौति, यस्य न केवलं पारमार्थिकम् अपितु इहलौकिकमपि महत्त्वम् अस्ति। अनेन कारणेन एव **अध्यासनिवृत्तिः वेदान्तस्य प्रयोजनस्वरूपा** इति स्वीक्रियते।यथोक्तम्— **"अस्य अनर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते।"**[16] अध्यासभाष्यस्य मनोविश्लेषणात्मकस्य अध्ययनात् भारतीयपरम्परायां मनोविज्ञानविषये गहनं चिन्तनं स्पष्टतया परिलक्ष्यते।भारतीयविज्ञानकाङ्ग्रेसस्य सन् १९३८ तमे वर्षे आयोजिते अधिवेशने विख्यातवैज्ञानिकः

---

[14] मुण्डकोपनिषद् 3.2.9

[15] भगवद्गीता 2.54

[16] ब्रह्मसूत्रशांकरमाप्य, उपोद्घात, पृ०५९

**जगदीशचन्द्रबोसः** विज्ञानस्य पञ्चविंशतिवर्षीयप्रगतेः समीक्षां कुर्वन् उक्तवान् यत् भारतस्य प्राचीनविद्वांसः अन्तर्दर्शनद्वारा ज्ञानप्राप्तौ विशेषां प्रतिभां धारयन्ति स्म। अस्यां दृष्ट्या ते पाश्चात्येषु स्वसहकर्मिभ्यः अपेक्षया उत्तमां स्थितिं धारयन्ति स्म।यदि एषा शक्तिः सम्यक् प्रकारेण विकसिताऽभवेत्, तर्हि गभीरान्तर्दर्शनमपेक्ष्यमाणाः समस्याः— यथा **विचारप्रक्रिया, उच्चतरसांस्कृतिक, सहजबुद्धिः** इत्यादयः—सफलतया समाधानं प्राप्नुयुः।अतः **सन्तानां योगिनां च रहस्यानुभवः** मनोवैज्ञानिकानुसन्धानस्य विषयः भवितुमर्हति, तथा च एतादृशस्य अध्ययनस्य कृते **भारतवर्षम् एव सर्वोत्तमं स्थानम्** इति तेन प्रतिपादितम्।

**सन्दर्भ-ग्रन्थ सूची (References)-**


1. श्वेताश्वतरोपनिषद्, गीताप्रेस, गोरखपुर, वि०सं० २०६६.
2. ब्रह्मसूत्रशांकरमाप्य, अनु० यतिवरमोलेवावा, भारतीय विद्या प्रकाशन, नई दिल्ली, प्रयमभाग, पृ०१०,२००४.
3. ब्रह्मसूत्रतांकरभाष्य, सम्पा० कन्हैया लाल जोशी (भामती, कल्पतरु, परिमन, टीकाओं महित), परिमल पब्लिकेशन्स, दिल्ली 1982
4. ब्रह्मसूत्रताङ्करभाष्य (एकादशीटीका संयुतम्), सम्पा० योगेश्वरदत्त शर्मा, नाय प्रकाशन, प्रथम संस्करण, 1997.
5. ब्रह्मसूत्रशाङ्करभाष्यम् (चतुःसूत्री, संपा० रमाकान्त तिवारी, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ, 1991.
6. ब्रह्मसूत्र-विद्योदेयभाष्यम्, उदयवीर शाखी, विजयकुमार गोविन्दराम हासानंद, दिल्ली, 2003
7. ब्रह्मसूत्रशाङ्करभाष्यम् (मत्यानन्दी-दीपिकया समत्तंकृतम्) व्या० स्वामी सत्यानन्द सरस्वती, चौखम्वा संस्कृत प्रतिष्ठान, दिल्ली, 2007.
8. उत्त्वप्रदीपिका सम्पा०, योगीन्द्रानन्द, पडदर्शनप्रकाशन प्रतिष्ठान वाराणसी, 1974.
9. भगवद्गीतातांकरमाप्य ५/१५, गीताप्रेम गोरखपुर, पृ०१५९.सं २०६६
10. वेदान्तसार, व्या० राकेशतास्त्री, पृ० १८५, परिमल पब्लिकेशन, २००४.
11. विवेकचूडामणि, अनु० मुनिलाल, पृ० २८. गीताप्रेस गोरखपुर वि० सं० २०६५
12. अभेदानन्द, शंकरोत्तर अद्वैत वेदान्त में मिथ्यात्व निरुपण, राजम्बान हिन्दी ग्रन्य अकादमी, जयपुर, 1973.
13. Principal Upanisads (Vol.1). (Eng. Trans & comm.), Swami Sivananda, The Yoga Vedanta Forest University, Divine Life Society, Rishikesh, 1950

14. kar, Bijanand, Indian Theory Of Error, Sophia Indological senes, No.3, Ajanta Book Intemational, Delhi, 1990.
15. Ramchandrana, T. P., The Concept of the Vy van rika in Advaita Vedanta, University of Indore, 1980.